**International Journal of Research in Social Sciences**
Vol. 9, Issue 4, April - 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

# धर्मशास्त्रगग्रन्थेषु राजधर्मः

**– डॉ. अनिता अग्रवाल**
**व. अध्यापक,**
**श्रीमती रीटा चन्द्रसक्सेना मेमोरियल महाविद्यालय,**
**रींगस, सीकर**

भारतीयजीवनदर्शनं भौतिकतावादिदर्शनं नास्ति। मानवजीवनस्य उन्नतेः कृते चत्वारः पुरूषार्थाः सन्ति। अत्र अर्थकामौ धर्ममोक्षस्य साधनभूतौ। पुरूषार्थचतुष्टये धर्मस्य विशिष्टं महत्त्वम् अस्ति। धर्मस्य लक्षणम् अस्ति।

**यतोऽभ्युदयनि श्रेयससिद्धिः स धर्मः।**[1]

धर्म एव निखिलजगतः प्रतिष्ठा अस्ति। धर्मस्य आचारेण पापानां नाशः भवति। मनुना उक्तं –

**धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः।**
**तस्माद्धर्मो न हन्तव्यो मानो धर्मो हतो वाधीत्।।**[2]

घृञ् धातोः धारणपोषणार्थाद् अर्थे मन् प्रत्ययेन धर्म शब्दो निष्पद्यते। अस्य अर्थः धारणं पालनं च भवति धरति लोकोऽस्मिन्, धरति लोकं वा, धरति विश्वम् इति।

मानवजीवने किं कुर्यात् किं न कुर्यात् अस्य वर्णन धर्मशास्त्रे एव प्रतिपादितम् अस्ति। धर्मशास्त्रस्य मुख्यमुद्देश्यम् अस्ति यत् मानवधर्मस्य तत्त्वानि गृह्णीयुः। धर्मशास्त्रस्य अपरनामस्मृतिः अस्ति। धर्मशास्त्रे वर्णाश्रमधर्माः, तेषां विशेषाधिकाराः, कर्त्तव्यानि, उत्तरदायित्वानि च, गर्भाधानात् अन्त्येष्टिं यावत् संस्काराः ब्रह्मचारीणां ब्रह्मचारीणां कर्त्तव्यानि, अनध्याय, स्नातानां कर्त्तव्यानि, विवाहसम्बन्धितविषयाः, गृहस्थानां दायित्वं, प्रायश्चितम्, श्राद्धः, स्त्रीधर्मः, क्षत्रियाणां धर्मः, राजधर्मः, पञ्चमहायज्ञाः इत्यादि विषयाणां चर्चा जायमाना अस्ति। धर्मशास्त्रे राजधर्मस्य विवेचनं विशेषरूपेण लभ्यते।

---

1 वैशेषिक धर्मसूत्र, श्लोक 1/1/2
2 मनुस्मृतिः

यदाऽऽरभ्य समाजे रागद्वेषाभिवृद्धिः, सत्यस्य ह्रासः, लोकमर्यादायाः अभावोऽलक्ष्यते, तदा दण्डनीतिरियं व्यवहारश्च बभूव। अर्थात् राज्यशासनस्य अपरिहार्यताऽभवत्। राज्यशासने राज्ञः प्रमुखं स्थानं भवति। मुनिना यास्केनोक्तम्– 'राजा राजतेः स चाऽयं राजा दिक्पालानां तेजसा दीप्तो भवतीति दुर्गाचार्यो व्याख्याति। व्याकरणानुसारेण राजृ धातोः कनिन् प्रत्ययेन राजन् इति शब्दो निष्पद्यते किन्तु महाभारते रञ्ज् धातोः शब्दस्यास्य निष्पत्तिः स्वीकृता–

**रञ्जिताश्च प्रजाः सर्वास्तेन राजेति शब्दद्यते।**[3]

तथा च

**लोकरञ्जनमेवाऽत्र राज्ञां धर्मः सनातनः।।**[4]

यद्यपि राजशब्दो राजतेः दीप्त्यर्थात् कनिन्प्रत्ययान्तः न तु रञ्जेः, तथापि धातूनामनेकार्थत्वात् रञ्जनात् राजा इत्युक्तम्। एतेनेदं वक्तुं शक्यते यत् 'राजन्' इति शब्दः राजृ दीप्तौ इति धातोर्निष्पद्यते। अतश्चोक्तम्–

**'बलेन चतुरङ्गेण यतो रञ्जयति प्रजाः।'**
**दीप्यमानः स वपुषा तेन राजाऽभिधीयते।।**[5]

शास्त्रेषु राज्ञो ये गुणाः प्रोक्तास्तेषु जितेन्द्रियत्वं सर्वतः प्रधानम्। इन्द्रियविजयरहितो राजा न कुत्रापि प्रशस्यते। राजा ज्ञानविद्यातपोविद्वान् सुदक्षिणान् असूयापरिवर्जितान् विप्रान् सेवेत।

इदं शरीरं रथो विद्यते, अत्र आत्मा रथी इन्द्रियाणि अश्वाः, ज्ञानं कुशा मनश्च सारथिर्विद्यते। राजा ज्ञानेन सर्वानेतान् वशीकुर्यात्। येन प्रकारेण पिता स्वस्य पुत्रं गुणवन्तं करोति तथैव राजाऽपि स्वस्य प्रजायां गुणाधाने समर्थः कुशलश्च स्यात्। येन

---

3 निरूक्ते 2–3
4 निरूक्ते 3
5 महाभारते शान्तिपर्वाणि 49.1225

**International Journal of Research in Social Sciences**
Vol. 9, Issue 4, April - 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

प्रकारेण याता स्वस्य पुत्राणाम् अपराधान् क्षमापयति तथा च तान् पुत्रान् पोषयति तथैव राजाऽपि प्रजानां पोषकः क्षमाशीलश्च स्यात्।

**'गुणसाधनसंदक्षः स्वप्रजाया पिता यथा।**
**क्षमयित्र्यपराधानां माता पुष्टिविधायिनी।।'**[6]

नृपे शक्तिमत्वं, दयालुत्वं कार्यपटुत्वं, स्मृतित्वं, मृदुत्वं, कुलीनता, जितेन्द्रियः, दुष्टजनानां सङ्गतिरहितः दूरदर्शी, वृद्धसेवकः, शत्रुनाशकः, शूरवीरः, चातुर्यं तथा चाऽयं तत्सदृशा गुणा आचार्येरूपदिष्टाः।

राजनीतिशास्त्रे राज्ञः बहूनि कर्त्तव्यानि कथितानि सन्ति। तानि संक्षिप्य केनचिदुक्तम्–

**''दुष्टस्य दण्डः सुजनस्य पूजा,**
**न्यायेन कोशस्य च सम्प्रवृद्धिः।**
**अपक्षपातोऽर्थिषु राष्ट्ररक्षा,**
**पञ्चैव यज्ञाः कथिता नृपाणाम्।।''**[7]

मनुस्मृतिकारः त्याज्यविषये उच्यते यत्–

**''मृगयाऽक्षो दिवा स्वप्नः परिवादः स्त्रियो मदः।**
**तौर्यत्रिकं वृथास्या च कामजो दशको गुणाः।।''**[8]

राज्यस्य सुष्ठुतया सञ्चालनं राजा कदापि एकाकी कर्तुं न शक्नोति। राज्य सुप्रशासनस्य अधिकारिणां नियुक्तिः परमावश्यकी राजा अधिकारिणां रूपे अमात्यानां, मन्त्रिणां, अध्यक्षाणां इत्यादीनाञ्च नियुक्तिं करोति। कोषे जनपदे दण्डे च एकैकस्मिन् त्रयाणां चराणां नियोजनं निरदिशत्।

राजशास्त्रे राज्यस्य सप्ताङ्गानि निर्दिष्टानि सन्ति–

**''स्वाम्यमात्यौ जनौ दुर्गः कोशो दण्डस्तथैव च।**
**मित्राण्येताः प्रकृतयो राज्यं सप्ताङ्गमुच्यते।।''**[9]

---

6 काणे पी.वी., धर्मशास्त्र का इतिहास, भाग 2, पृष्ठ 27
7 काणे पी.वी., धर्मशास्त्र का इतिहास, भाग 2, पृष्ठ 601
8 मनुस्मृति 7/46
9 काणे पी.वी. धर्मशास्त्र का इतिहास, भाग 2 पृष्ठ 601

**International Journal of Research in Social Sciences**
Vol. 9, Issue 4, April - 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

सप्ताङ्गेषु राजा सर्वश्रेष्ठोऽभिमतः। राजा प्रजायाः रक्षां करोति। धर्मस्य आचरणं करोति। समयानुसारेण कार्यं करोति। राजा सर्वान् प्राणिनः प्रति समभावनां कुर्यात्। अमात्यस्य नियुक्तिः अपि राजा कुर्यात्।

दुर्गं राज्ञां बलं भवति। तत्र स्थित्वा एकोऽपि शतं योधयति शतं च दशसहस्राणीति राजां कृते दुर्गनिर्माणमावश्यकम्।

विष्णुधर्मसूत्रे अस्ति यत् –

**''धन्वनृमहीवारिवृक्षगिरिदुर्गाणामन्यतमं दुर्गमाश्रयेत्।''**
**एवं राजा स्वदेशानुसारेण दुर्गाणि कारयेत्।।''[10]**

मित्रलाभोराज्ञः कृते आवश्यकोऽस्ति। कोशस्य वृद्धि अपि अनिवार्या भवति। यतोहि राज्यस्य उपरि यदा कोऽपि विपत्ति आगच्छति तदा राजा कोशस्य धनं प्रयुङ्कते। कोशस्य वृद्धये हेतु विभिन्नकराणां व्यवस्थां करोति।

तैत्तिरिय संहितायां दूतस्य विषये कथ्यते यत्–

**'अग्निर्देवानां दूत आसीत् उशनाकाव्यो सुराणाम्।'[11]**

दूतस्य कार्याणि उच्यते मनुस्मृतिकारेण यत् दूत एव हि भिन्नानां सन्धिसम्पादने क्षमः संहतानां च भेदेन तथा परदेशे दूतस्तत्कर्म करोति येन संहता भिद्यते तस्माद्दूते सन्धिविग्रहौ विपर्ययावायत्ताविति।

जनपदस्य कृत राष्ट्र शब्दस्य प्रयोगः भवति। राष्ट्रस्य सम्बन्धः भूखण्डेन सह वर्तते। राष्ट्रे विना राज्ञः कल्पना न भवति। ऋग्वेदे कथ्यते यत्–

**''मम द्विता राष्ट्रं क्षत्रियस्य''।[12]**

निष्पक्षन्यायः अपराधिनां कृते दण्डदानं च राज्ञः प्रमुखकार्येषु आसीत्। दण्डयति अनेन इति दण्डः तथा दाम्यति अनेन इति दण्डः। इति उच्यते। राजा न्यायस्य हेतुरासीत्। राजानं प्रतिप्रजानामेवं कर्त्तव्यं भवति। प्रजा शान्तिं निर्मापयेत्। न्यायव्यवस्थायाः कृते राजा न्यायाधीशस्यापि नियुक्तिं करोति। न्यायस्य कृते न्यायाधीशः

---

10 विष्णु धर्मसूत्र 37.23
11 तैत्तिरियसंहिता 2.4.8.7
12 ऋग्वेद 4.42.1

चतुष्पादव्यवहाराणामाचरणं करोति। ते सन्ति – भाषापादः उत्तरपादः, क्रियापादः, साध्यसिद्धिपादः च। यदि बहूनि आवेदनानि सहैव उपस्थितानि स्युः तर्हि वर्णक्रमानुसारं तेषामुपरि विचाराः विधेयः। दिनस्य द्वितीये भागे राजा पौरजनानपदानां कार्याणि निस्तारयेत् मनुना अपि उक्तं यत् एवं विधविपक्षमहीक्षिदभ्यः प्रजानां रक्षणादवाप्तवृत्तिः तासामेव इतरेतरविवादजनपीडापरिहार्थं ऋणादानाद्यष्टादश विवादे विरूद्धार्थार्थिप्रत्यर्थिवाक्यजनितसन्देहहारीविचारः एव व्यवहारः। मन्वादिभिः चत्वारः उपायाः कथिता सन्ति। ते सन्ति–

**''उपायाः साम दानं च भेदो दण्डस्तथैव च।**
**सम्यक्प्रयुक्ताः सिद्धयेयुर्दण्डस्त्वगतिका गतिः।।''**[13]

सामविषये कथ्यते यत्–

**''उपायांस्त्वां समाचक्ष्व सामपूर्वान्महाद्युते।**
**लक्षणं च तथा तेषां प्रयोगं च सुरोत्तम्।।**[14]

स्वस्वत्वनिवृत्तिपूर्वकपरत्वत्वोत्पादनानुकूलो व्यापार दानम्। दानेन तु देवा अपि मनुष्याणां वशं भवति। दमयतीति दण्डः इति व्युत्पत्तिः। स च वितस्य शरीरस्य वा पीडनम्। दण्डस्य भयेन चरचराः सर्वे प्राणिनो भोगं कर्तुं समर्था भवन्ति। राज्ञः प्रयोजनसिद्धये सर्वप्राणिनां रक्षितारं धर्मस्वरूपं पुत्रं ब्रह्मणो यत्केवलं तेजस्तेन निर्मितं न पाञ्चभौतिकं दण्डं ब्रह्मा पूर्वं सृष्टवान्। मनुस्मृतेः उक्तं यत्–

**सर्वो दण्डजितो लोको दुर्लभो हि शुचिर्नः।**
**दण्डस्य हि भयात्सर्वं जगद्भोगाय कल्पते।**[15]

मत्स्यपुराणे भेदविषये कथ्यते–

**''परस्परं तु ये द्विष्टाः क्रुद्धा भीतावमानिताः।**
**तेषां भेदं प्रयुञ्जीत भेदसाध्या हि ते मताः।।''**[16]

13 याज्ञवल्क्यस्मृति 1/346
14 वीरमित्रोदय राजनीतिप्रकाश पृ. 279
15 मनुस्मृतिः 7/22
16 मत्स्यपुराणम्

उपायानमेतेषां प्रयोगेण राजा न केवलं शत्रून् वशीकरोति अपि तस्य अपकारिणामन्येषामपि अनौचित्यपरायणानां वशीकरणाय एतेषामुपायानां प्रयोगोऽभिमतः। तथा चोक्तं मिताक्षरायाम् यत् अपराधिनं तदपराधं च दृष्टा तत्तदुपायाः प्रयोक्तव्या भवन्ति।

एवं राजधर्मे राजा प्रमुखः भवति। तस्य आधारो वंशक्रमः भवति। राजधर्मः सर्वेषु धर्मेषु श्रेष्ठः अस्ति। यतोहि अन्येषु सर्वेषु धर्माः धर्मस्य आश्रये वर्धन्ति। चत्वारः आश्रमधर्माः चत्वारः वर्णधर्माः च सर्वे राजधर्मस्य उपरि आश्रितः। राजा अपि राजधर्मस्य पालनं कुर्यात्। तदा एव प्रजा सन्तुष्टा भवति। तस्य राज्यं वृद्धिं प्राप्नोति।

,,,,,,,

# सन्दर्भग्रन्थसूची


| क्र.स. | ग्रन्थना | लेखकः / सम्पादकः | प्रकाशनम् |
|---|---|---|---|
| 1. | धर्मशास्त्र का इतिहास | पी.वी.काणे, अनु. अर्जुन चौबे | उत्तप्रदेशहिन्दीसंस्थानम्, लखनऊ |
| 2. | धर्मसिन्धुः | सं. वासुदेवलक्ष्णशास्त्री | चौखम्बासूरभारतीप्रकाशनम्, वाराणसी |
| 3. | भगवन्तभास्करः | नीलकण्ठभट्टः | चौखम्बासूरभारतीप्रकाशनम्, वाराणसी |
| 4 | मनुस्मृतिः | गजाननशास्त्रिमुसलगांवकर | चौखम्बासूरभारतीप्रकाशनम्, वाराणसी |
| 5 | याज्ञवल्क्यस्मृतिः (व्यवहाराध्यायः) | डॉ. कमलनयनशर्मा | जगदीशसंस्कृतपुस्तकालयः, जयपुरम् |
| 6 | वीरमित्रोदयः | सं. विष्णुप्रसादशर्मा | चौखम्बासूरभारतीप्रकाशनम्, वाराणसी |
| 7. | अर्थशास्त्रम् | सं. वाचस्पतिगैरोला | चौखम्बासूरभारतीप्रकाशनम्, वाराणसी |
| 8 | अमरकोषः | सं. बालशास्त्री | चौखम्बासूरभारतीप्रकाशनम्, वाराणसी |
| 9. | संस्कृतहिन्दीकोषः | वामनशिवराम–आप्टे | चौखम्बासूरभारतीप्रकाशनम्, वाराणसी |
| 10. | महाभारतम् | वेदव्यासः | गीताप्रेस गोरखपुरः |
| 11. | भारतीय धर्मशाखायें और उनका इतिहास | वाचस्पति गैरोला | चौखम्बासूरभारतीप्रकाशनम्, वाराणसी |
| 12 | विष्णुपुराणम् | शिवप्रसादद्विवेदी | चौखम्बासूरभारतीप्रकाशनम्, वाराणसी |
| 13 | मत्स्यपुराणम् | सं. कालीचरण | चौखम्बासूरभारतीप्रकाशनम्, वाराणसी |
| 24 | धर्मद्रुमः (इतिहासः) | राजेन्द्रपाण्डेयः | चौखम्बासूरभारतीप्रकाशनम्, वाराणसी |
| 25. | निर्णयसिन्धुः | सं. नारायणराम–आचार्यः | चौखम्बासूरभारतीप्रकाशनम्, वाराणसी |
| 26 | राजनय के सिद्धान्त और व्यवहार | कृष्णारायः | चौखम्बाप्रकाशनम्, वाराणसी |
| 27. | श्रीमद्भागवतमहापुराणम् | सं. रामतेजपाण्डेयः | चौखम्बाप्रकाशनम्, वाराणसी |
| 28. | श्रीयाज्ञवल्क्यस्मृतिः (आचाराध्यायः) | डॉ. कमलनयनशर्मा | जगदीशसंस्कृतपुस्तकालयः, जयपुरम् |
| 29. | धर्मसूत्रों ने राजधर्म एवं न्याय व्यवस्था | सुधाशर्मा | ईस्टर्न बुक लिंकर्स, दिल्ली |